वर्ष-०९, जूलाइ-डिसेम्बर-२०१५
अङ्कौ-६४-६५ (संयुक्ताङ्कौ)

ISSN 2321-1342
वार्षिक रु-१५०

# देवसायुज्यम्

संस्कृत-त्रैमासिक-पत्रिका,

सम्पादकः
डॉ.प्रफुल्लः पुरोहितः



पञ्चमी राष्ट्रियसंस्कृतपत्रकारसङ्गोष्ठ्याः चित्राणि ।

Scanned with CamScanner

# ।। आतङ्कवादः एवं विश्वशान्तिः ।।

सांप्रतम् आतङ्कवादो न केवलं भारतवर्षस्य अपि तु समग्रविश्वस्य भीषणसमस्या वर्तते । अयम् अकाल-मेघवत् न जाते कुत्र विनाशलीलां प्रसारयेद् इति न कस्यापि विदितम् । आतङ्कवादेन मानवजीवनं प्रतिपलं विनाशाभिमुखं वर्तते । इदानीं मुम्बय्यां वयं दृष्टवन्तः आतङ्कवादस्य विनाशोऽयम् । प्रश्नो वर्तते यत् किम् आतङ्कवादिनः मनुष्याः न सन्ति खलु ? वस्तुतः आधुनिकमानवजीवने यदि सूक्ष्मतया मानवव्यवहारावलोकनं कुर्मः तर्हि ज्ञायते यत् मानवव्यवहारसम्बन्धिषु सर्वेषु क्षेत्रेषु प्रायः स्थूलरूपो वा सूक्ष्मरूपःआतङ्कवादः निगूढायते । धार्मिकजीवने, सामाजिकजीवने, दैनन्दिनजीवने वर्तमानेषु लघुकार्येषु अपि अस्माभिः ज्ञात्वा वा अज्ञात्वा आतङ्कवादोऽयम् आचर्यते । कर्मचौर्यं कुर्वन्तः सर्वेऽपि जनाः सूक्ष्मदृष्टया आतङ्कवादिनः। सूक्ष्मरीत्या आचरितोऽयम् आतङ्कवादः शनैः शनैः पिशाचरूपो विकरालो भयानको मानवविनाशश्च भवति । आतङ्कवादः बहिष्ठात् न आगच्छति खलु ! गानवसमाजात् एव उद्भवति । काऽपि महिषी वा कोऽपि सिंह आतङ्कवादी जातः किम् ? आतङ्कवादस्य कानि कारणानि इति चिन्तने सति बहूनि कारणानि दृष्टपथे आयान्ति । न किंश्चदेकं कारणं निर्धारयितुं शक्यते आतङ्कवादस्य ।

स्वार्थपरता-स्वार्थनिबद्धा संकुचिता दृष्टिः आतङ्कवादस्य मूलम् । महाकविना माघेनापि शिशुपालवधमहाकाव्ये उक्तं यत् सर्वः स्वार्थं समीहते । स्वार्थपरतायाः अभिव्यक्तिः नैकरूपेषु प्रकटीभवति । एषैव साधनरूपेण आतङ्कवादं पोषयति प्रसारयति च - यथा क्षेत्रवादः, भाषावादः, धर्माधन्ता, आर्थिकी विषमता, समन्वयस्य अभावः न्यायपालिकायाः दुर्बलत्वम्, नैतिकमूल्यानां ह्रासः, प्रशासनस्य निष्क्रियत्वम्, राजनीतिकं वा कारणम् । अद्यत्वे विश्वस्य राजनीतौ पारस्परिकव्यवहारे च क्षेत्रवादो विशेषरूपेण विभेदकतत्त्वरूपेण प्रवर्तते । देशस्य प्रत्येकं क्षेत्रे सामाजिकम्, आर्थिकं भौगोलिकं राजनीतिकं वा कारणम् आश्रित्य स्वीयां स्वतन्त्रतां पृथग् अस्तित्वं च वाञ्छति । तदर्थं ते आतङ्कवादस्य सहयोगं आश्रयन्ते । भारते कश्मीरसमस्या, मिजोरमसमस्या, नागालैण्डसमस्या च क्षेत्रवादाश्रयणेन आतङ्कवादम् आश्रयन्ते । केचन देशाःस्वस्वार्थसिद्ध्यै शक्तिप्रदर्शनाय च स्वसमीपस्थं देशं स्वायत्तं कर्तुम् आतङ्कवादम् आश्रयन्ते । आर्थिकसमस्यावशात् केचन जनाः आतङ्कवादिनः भवन्ति । शिक्षां प्राप्य निरोद्योगिनः युवानोऽपि एतादृशीं विध्वंसकरी वृत्तिं आश्रयन्ते यथा - नकसलवादिनः।



Scanned with CamScanner

इदानीन्तनसंपूर्णविश्वं परितः असुरक्षा आतङ्कवादः अशान्तिश्च सर्वत्र दरीदृश्यते। मानवसभ्यता आग्नेयास्त्राणामुपरि निष्ठन्नास्ति। कस्मिन्नपि क्षणे तेषां विस्फोटः मानसभ्यतायाः कृते अन्तिमकालः सम्भविष्यति एवं मानवसभ्यतायै मानवः स्वयं कालरूपो भविष्यति। पृथिव्यां सर्वे जनाः भयक्रान्ताः अशान्ता अवशादग्रस्ताश्च अवलोक्यते। पृथिव्याः शोषणं तु क्रियते सहैव अन्तरिक्षस्य सागराणां पर्वतानाम् अपि मूलस्वरूपं विकृतं कृतं तथापि उपभोक्तृवादे निमग्नः मानवः असन्तुष्टः सन् शान्तिं सन्तोषमानन्दश्च नानुभवति। एतादृशी सर्वसुलभां भौतिकसमुन्नतिम् आस्वादयन्नपि कथं व्याकुलतां भजति मानवः। एते प्रश्नाः (समस्याः) सन्ति अस्माकं सन्मुखे।

अस्यां परिस्थितौ विश्वशान्तिरेव समाधानम्। समग्रजागृतिकरणं तु जातं परं वसुधैव कुटुम्बकम् इत्युदारता नोपलभ्यते। आतङ्कवादस्य कारणम् एकेन वाक्येन यदि वक्तुमिच्छामः चेत् एवं शक्यते यत् - विद्या विवादाय धनं मदाय शक्तिः परेषां परपीडनाय। तस्यैव समाधानम् एतस्यां पङ्कतौ निहितं वर्तते यत् - साधोविपरीतमेतद् ज्ञानाय दानाय च रक्षणाय। इदानी विश्वपरिवारस्य तु कल्पना का ? इति चिन्तने सति विश्वकल्याणाय शान्त्यै च केचन् ध्यातव्या अंशाः निम्नलिखिताः सन्ति।

- जगन्नियामकं तत्त्वं एकमेव इति विश्वासः।
- संपूर्णविश्वस्य एका भाषा कल्पनीया।
- U.N.O. द्वारा शान्त्यार्थं क्रियमाणानि सर्वाणि कार्याणि सर्वैः देशैः अङ्गीकरणीयानि।
- मम ग्रामः, मम देशः, मम विश्वम् इति भावना विकसेत् हृदयेऽस्माकम्। यत्र विश्वं भवत्येकनीडम्।
- दुःखार्तानां सेवा सहायता च करणीया।
- भौतिकसुखं परित्यज्य आत्मसुखम् अनुभूयताम्।
- वयं सर्वदा सर्वत्रैव शिवसंकल्पाय।

यथा इदानीं गुजराते स्वर्णिम् संकल्पाः। ॐ द्यौः शान्तिरन्तरिक्ष शान्तिः पृथिवीशान्तिः। महात्मागान्धी अपि वदति स्म यत् मानवस्य हृदये ईश्वरस्य निवासो वर्तते, तस्मिन् हृदये यादृशी वर्तते शान्तिः तादृशी एव अहं कामये न तु स्मशानभूमौ स्थिता। (यजुर्वेद-३६/११)

आपूर्यमाणमचलः प्रतिष्टं समुद्रमापः प्रविशन्ति यद्वत्।
तद्वत् कामायं प्रविशन्ति सर्वे, सः शान्तिमाप्नोति न कामकामा॥

(श्रीमद्भगवद्गीता-२/७०)



Scanned with CamScanner

विहाय कामान्यः सर्वान्पुमांश्चरति निस्पृहः।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ॥
(श्रीमद्भगवद्गीता-२/७१)

लोकसेवापरायणाः वास्तविकीं शान्तिं प्रपद्यन्त इति नित्यमेव प्रत्यक्षं सुचक्षुषाम् । न केवलं मानवैः अपि तु पशुभिरपि लोकसेवापरायणीभूताः अमरीकृतं स्वजीवनम् । येषां मनसि शिवसङ्कल्पो न भवति ते प्राप्तेऽपि वैभवे शान्तिं नानुभवन्ति । उद्यानकुल्यां प्रवेशे जले समग्रोद्यानं प्रसन्नातायते यतः स जलामृतप्रवाहः उद्यानाय नवपल्लवितायाः वरं यच्छति तथैव मानवहृदये प्रेम-स्नेह-वात्सल्यरूपप्रसन्नतायाः अमृतप्रवेशः जगतः जीवाय निर्भयतायाः निर्ग्रन्थतायाः, निर्वैरत्वस्य च वचनं समर्पयति । अतः गीतायां उक्तम् - प्रसादे सर्वदुःखानां हानिः। प्रसन्नचेतसः हि स्थितधीः, मुनिः संयमी च भवितुं शक्नोति । स एव शान्तिं ब्रह्मनिर्वाणं चाधिगच्छति । स्थिते प्रसादसागरे कीदृश आतङ्कवादः, विवादः, प्रदेशवादः, भाषावादः, क्षेत्रवादः, जातिवादः च । हृदयस्य विशालत्वं, मनसः प्रसन्नत्वं, चेतसः स्नेहादिवृत्तित्वं च रक्षणीयम् इति जीवनलक्ष्यं भवेत् अस्माकम् । हृदये अस्माकं प्रतिनिधित्वं भवेत् प्रसन्नतायाः, साम्राज्यत्वं भवेत् विशालतायाः, अधिकारत्वं भवेत् प्रेमस्नेहवात्सल्यादीनां च । तस्मात् अस्माकं हृदये सर्वदा एतादृशी भावना स्यात् यया सर्वत्र शान्तेः साम्राज्यं भवेत् । इयमेव अस्मदीया प्रार्थना -

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ॥
ॐ शान्तिः शान्तिः शान्तिः

- डॉ.ललितः पटेलः

## निवेदनम्

पत्रिकायां प्रकाशयितुं सरलभाषया लिखताःलेखाःअपेक्षिताः। लेखाःअतीव सरलया शैल्या लिखिताःस्युः। ज्ञानवर्धकलेखाः,कथा,कविता,शिशुलेखा,वार्ता च प्रेषणीयाः। अन्यत्र प्रकाशिताः,प्रकाशनाय प्रेषिता वा लेखाःकृपया न प्रेषयन्तु । भवतां विद्यालये-महाविद्यालये-विश्वविद्यालये-नगरे-प्रान्ते-देशे च संस्कृतसम्बद्धा ये केऽपि कार्यक्रमाःभवन्ति तेषां विवरणं अवश्यं प्रेषयन्तु ।पत्रिका विषये स्वीयं मतामतं संक्षिप्तरुपेण अवश्यं -लिखन्तु । पत्रिकायां प्रकाशिततथ्यानामुत्तरदायित्वं लेखकानां भविता ।



Scanned with CamScanner